अक्टूबर तः दिसम्बर २०२४ पर्यन्तम्
आश्विन-कृष्ण-चतुर्दशी तः पौष-शुक्ल-प्रतिपदा पर्यन्तम्
(वै-२०८१)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-१२ संयुक्ताङ्कः-३-५

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

**एक साहित्यिक त्रैमासिक शोध पत्रिका**

**एवं**

**समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति**

**तथा**

**सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति**

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

**संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मञ्जरी"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२०९२०३६३**

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अक्टूबर तः दिसम्बर २०२४ पर्यन्तम्

वर्षम्-१२-संयुक्ताङ्कः-३-५

(वै.-२०८१)

(आश्विन-कृष्ण-चतुर्दशी तः पौष-शुक्ल-प्रतिपदा पर्यन्तम्)

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोजकुमारः

टंकण/आवरण/सज्जा
पूजागड़ाकोटी

| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | उत्थिते शाङ्र्गपाणौ | डॉ. हर्षदेवमाधवः | १ |
| ३. | त्वमेवासि | ,, | २ |
| ४. | दु:खानि | ,, | ३ |
| ५. | अभावः | ,, | ५ |
| ६. | पितुरङ्गुलिं त्यक्त्वा | ,, | ६ |
| ७. | वाणी वन्दना | डॉ. देवी सहाय पाण्डेयः "दीपः" | ७ |
| ८. | भव्या भारतभूमिः | ,, | ८ |
| ९. | बालकेभ्यः सामूहिकप्रार्थना | ,, | ८ |
| १०. | आदर्शबालकः | ,, | ९ |
| ११. | सततिशिक्षाग्रहणम् | ,, | ९ |
| १२. | संस्कृते बालकानां रुचिः | ,, | ९ |
| १३. | पठनीया भाषा-संस्कृतम् | ,, | १० |
| १४. | जागरणगीतम् | ,, | १० |
| १५. | अहं मयूरः | वेदविभूषणो दण्डपाणिराचार्यः | ११ |
| १६. | अभ्यासेन विश्वासेन च सर्वं शक्यम् | डॉ. अञ्जना तिवारी | १२ |
| १७. | गांधी महोदय प्रति अप्रेषितम् पत्रम् | डॉ. निरंजना जोशी | १४ |
| १८. | सर्वं श्रमेण सिध्यति | डॉ. वर्दा वसा | १५ |
| १९. | प्रत्युत्पन्नमतिः श्रेष्ठी | डॉ. केशवराम शर्मा | १७ |
| २०. | व्यावहारिक संस्कृतम् | मनोज कुमारः | २१ |

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशक:

सचिव:

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाष: - 011-23635592, 23637798


## सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹25 रूप्यकाणि

वार्षिकम् : ₹250 रूप्यकाणि


ISSN : 2347-1565



©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi


शुल्कप्रदानप्रकार:

बैंकधनादेश: (डी०डी०), डाकधनादेश: अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)


E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com

Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरभारतीसमुपकाः सुहृदयाः!**

सामान्यतः मनुष्यकर्माणि भावैः प्रेरितानि न तु बुद्ध्या। बुद्ध्या प्रेरितानि कर्माणि मनसि भार इव प्रतीयन्ते। जीवनदुःख-भार-वहनं न सद्नीतिः, न च कुशल-व्यवहारः। पञ्चतन्त्रम्, हितोपदेशः, कथासरितसागरः, नीतीशतकम् इत्यादिभिः माध्यमैः जीवनाय समीचीनदिशायाः प्रदानं बालानां समस्यानां समाधानञ्च आवश्यकम्। एतेषां शिक्षणग्रन्थानां शिक्षायाः आधारेण एतत्सर्वं सम्भाव्यमिति मनसि निधाय दिल्लीसंस्कृताकादम्याः मासिकीबालपत्रिकायां संस्कृतचन्द्रिकायां बालमनोनुकूलाः रुचिवर्धकाः उत्तमाः रचनाः प्रकाश्यन्ते। संस्कृताध्येतॄणां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः द्वादशतमवर्षस्य अक्टूबरतः दिसम्बर २०२४ पर्यन्तं प्रकाशितः संयुक्तांकः (३-५)सम्पर्यते। संयुक्तांकेऽस्मिन् डॉ. हर्षदवेमाधवमहोदयानां, डॉ. देवीसहायपाण्डेयमहोदयानां, वेदविभूषणो दण्डपाणिराचार्यमहोदयानां, डॉ. अंजनातिवरीमहोदयानां, डॉ. निरंजनाजोशीमहोदयानां, डॉ. वर्दावसामहोदयानां, डॉ. केशवरामशर्ममहोदयानां तथा च श्रीमनोजकुमारमहोदयानां नीतिविषयकाः रचनाः प्रकाशिताः सन्ति।

आशासे बालपत्रिकेयं बालकैः सोत्साहं पठिष्यत इति।

**शकाब्दः - १९४६**

**भावत्कः**
**डॉ. अरुणकुमारझा**
**सचिवः**

# उत्थिते शाङ्र्गपाणौ

-डॉ. हर्षदेवमाधवः

उत्थिते शाङ्र्गपाणौ
परिवर्तितं पार्श्वं शेषनागेन,
मात्स्यिकेन प्राप्ता
रोहितमत्स्योदराद्
दुष्यन्तस्य मुद्रिका,
उन्मत्तेन पुरुरवसा लब्धो
वृक्षकोटरात् सङ्गमनीयो मणिः,
ऋतुपर्णेन सह निर्गतो नलो
दमयन्त्याः द्वितीयस्वयंवरार्थं
कुण्डिनपुरम्,
पुष्पितो जातः
सुवर्णाशोकवृक्षो मालविका भाग्यपरिवर्तनार्थम्,
हनुमता प्रत्यभिज्ञाता
अशोकवाटिकायां रामस्य चिच्चन्द्रिका,
पुष्पकविमानमवतीर्णं
रामगिरौ
यक्षं पुनर्नेतुमलकाम्,
स्वर्गान् निर्वासितेन पुरन्दरेण
पुनरपि पराजितो दैत्यसर्पः,
शिवनेत्राग्निदग्धः कामः पुनर्जीवितो जातो
हिमगिरिनन्द्रयाः कृपाकटाक्षेन,
भीमगदया चूर्णीभूतः
कौरवकुलकलङ्कम्।
अथ किम्।
अलकनन्दे!
उत्थिते शाङ्र्गपाणौ
पेरिसविपणौ

प्रसृतः पुष्पसौरभराशिः,
'बिनबेन' समयाट्टसमीपे
युवमिथुनैः
पुनरप्यालिङ्गनबद्धैः
प्रारब्धं नववर्षनृत्यम्,
टोक्योनगररथ्यासु
निर्गता धूपशलाकाहस्ता
'गेद्शा' अभिसारिकाः
स्वप्रियवसतिम्,
प्रभ्रष्टेन कोलम्बसप्लवेन
स्पृष्टा
नवविश्वभूमिः।
अलकनन्दे!
उत्थिते शाङ्‌र्गपाणौ
त्वमप्यतीर्णा
सुरेन्द्रलोकान्-
नारदसन्देशेन...।
अहं स्वाङ्‌गुलिं दृष्ट्वा
मम जीवनस्य
करोमि प्रतीतिम् ।।

## त्वमेवासि

अलकनन्दे!
त्वं समीपं भवसि
तदा सामीप्यमात्मीयं भवति।
त्वं दूरे भवसि
तदा त्वदुपस्थितिसौरभं
परिमलायते सर्वत्र।
त्वं पार्श्वे भवसि

तदा
कालावरणं क्षरति।
त्वं पृष्ठे वर्तसे
तदा गगनं सुवर्णातपं धृत्वा तिष्ठति।
त्वं पुरतो दृश्यसे
तदा वृद्धगात्रं त्यक्त्वा
मनो वृष्टिरोमाञ्चमनुभवति।
त्वं स्मर्यसे
तदा
समृद्धिर्भवति साम्राज्यस्य।
त्वमेवासि
यया जीवितफलं प्राप्नोम्यहम्।

## दु:खानि

दु:खानि पतन्ति मनुष्येषु
यथा पतन्ति जलप्रपाता:
पर्वतशिखरेषु।
दु:खानां सन्ति वात्यासारा:,
दु:खानां भवन्ति दावानला:
सुखप्रदेशेषु।
दु:खानि प्ररोहन्ति हृदयेषु
नेत्रजलेन।
दु:खानि वृष्टिकालेऽपि
आनयन्ति दुर्भिक्षकालं
स्वप्नानाम्।
दु:खानि ससुखं वसन्ति
महालयेष्वपि।
मारुतो न शोषयति दु:खानि,
न छिन्दन्ति तानि शस्त्राणि।
दु:खानि सप्तसमुद्रान् पारं कृत्वापि
प्रविशति हृदयम्।

दु:खानि पातालं भित्त्वा
प्रादुर्भवन्ति सहसा।
दु:खानि गच्छन्ति गृहाद् गृहम्
अतिथिरूपेण, दु:खानि सुखेभ्य ईर्ष्यन्ति,
अनुरागेभ्यो दुह्यन्ति,
आनन्देभ्य: क्रुध्यन्ति
तथापि
ये निश्चला ते वीरा:, महारथिन:।
किन्तु
ये दु:खेभ्य: पलायन्ते,
ते सन्ति कातरा:।
ये दु:खेभ्य: श्रान्ता भूत्वा
स्वात्मघातं कुर्वन्ति
ते सन्ति कापुरुषा:।
ये दु:खानि दृष्ट्वा रुदन्ति
ते सन्ति जीवन्मृता:।
अतो हि
वयं खादामो दु:खानि रोटिकाभि:।
वयं पिबामो दु:खानि जलेन।
वयं हन्मो दु:खानि शत्रुभि: ।
वयं दु:खानि पारं कृत्वा गच्छाम: जीवनमार्गम् ।
अधुना
अन्नवद् दु:खानि सुपाच्यानि ।
अस्माभि:
स्वयमेवनिर्मिता:
दु:खविषाणूनां प्रतिकारार्थं
नवा: सुखकोषा:।
पतन्तु.... वर्षन्तु....
प्ररोहन्तु तानि
यथाबलम्।
अनिर्वचनीये म आनन्दसाम्राज्ये
निवसन्ति

कतिपयानि दु:खानि पामराणि
किन्तु सम्राजि
रङ्केभ्य आश्रयं दातुम्
औदार्यं
भवेदेव।

## अभावः

पामरः कृषक एव जानाति
दुर्भिक्षकालस्य पर्यायम्।
अकञ्चिना स्त्री न पृच्छति
केनापि दत्ताया एकस्याः शाट्या मूल्यम्।
पदातिमार्गे सुप्तात्
क्षुत्क्षामकण्ठाद् भिक्षुकाद् ऋते
कोऽवगच्छति
'अन्नं वै ब्रह्म'? इति।
भूकम्पग्रस्तजनो जानाति
क्षुद्रोटजसुखम्।
रथ्यायां शीतकाले
वेपमानस्यानिकेतस्य गात्राणि
वह्नेरावश्यकतया
कथं न परिचितानि?
परदेशे स्थितः स्वजनः
केवलं
विरहदु:खं कथयितुं शक्नोति ।
तथैव
त्वमपि त्वदस्तित्वस्य महत्त्वं
ज्ञातुमर्हसि
तदभावं कल्पयित्वा ।।

# पितुरङ्गुलिं त्यक्त्वा

यथा
मेलायां
कोऽपि शिशुकः
क्रीडनकानि वीक्ष्य
पितुरङ्गुलिं त्यक्त्वा
विस्मरति पितरं
तथैव
अहमपि वियुक्तस्त्वदङ्गुलिं परित्यज्य
पश्यन् स्थितः
त्वन्निर्मितानि क्रीडनकानि।
प्रभ्रष्टोऽस्मीति
विस्मृत्य

-संङ्केत्तम्
८, राजतिलकबंगलोज,
ममता औषधालयस्य सम्मुखे
आबादनगरम् बस स्थानकं, पार्श्वे-बोपल
अहमदाबादम्-३८००५८

# वाणीवन्दना

-डॉ. देवीसहायपाण्डेयः 'दीपः'

विद्याबुद्धिं देहि शारदे हृदये शुद्धिं देहि शारदे।
काव्यकलासङ्गीतसाधने भावे वृद्धिं देहि शारदे ।।

कमलासने मरालवाहने वीणापुस्तकधरे शोभने।
वरदे सौम्यानने सौख्यदे सकलसमृद्धिं देहि शारदे।।

नव्यजागरणयुगमायातं युगं हि नव्यचेतनास्नातम्।
बालविहगकण्ठेषु नवस्वरगीते सिद्धिं देहि शारदे ।।

# बालगीतलेखनाय वाणीवन्दना

शारदे विशारदे मरालवाहने शुभे।
सुबालगीतिलेखनाय देहि मे मतिं शुभे ।।
अनेन गीतिलेखनेन बालवृन्दमोदनेन ।
ज्ञानभालमण्डनाय देहि मे गतिं शुभे ।।

भवेत्तु गीतगुञ्जनं सुकाव्यनन्दने वने।
जने-जने भवेत्तु चेतनाप्रसारणं शुभे।।
लभेत भारतं पुनर्जगद्गुरोर्गौरवम्।
भवेत्तु शीघ्रमेवमज्ञतानिवारणं शुभे ।।

## भव्या भारतभूमिः

रक्षति नगाधिराजः प्रहरी रजतकिरीटं धृत्वा।
चरणं प्रक्षालयति सागरः स्वं कर्त्तव्यं मत्वा ।।
गङ्गायमुने कण्ठे हारः कुण्डल इव कश्मीरः ।
व्यजनं कलं करोति सुरभितो मञ्जुलमलयसमीरः ।।
विन्ध्यपर्वतो यथा मेला कट्यां लसति ललामः।
स्नापयति विमलधाराभिर्विद्युद्धरघनश्यामः ।।
रचनाभूमिर्वेदानां या यत्र भवत्यवतारः।
यत्रोपनिषदां रामायणभारतरचनाविस्तारः ।।
यत्र सभ्यता प्रथमा जाता यया सभ्यसंसारः ।
भव्या भारतभूमिर्यस्यां विमलभावसञ्चारः ।।

## बालकेभ्यः सामूहिकप्रार्थना

देहि विद्याबलं ज्ञानं वयं ते बालका भगवन् ।
देहि चारित्र्यमहिमानं वयं ते बालका भगवन् ।।
दीनसेवां सदाचारं परोपकारं जनोद्धारम्।
देहि देशाय बलिदानं वयं ते बालका भगवन् ।।
आत्मभावस्य विस्तारं जीवनं निर्विकारञ्च।
देहि सारल्यसम्मानं वयं ते बालका भगवन् ।।
पुण्यकर्त्तव्यपथगमनं दुरितदुर्भावनादमनम्।
देहि कल्याणमुत्थानं वयं ते बालका भगवन् ।।

## आदर्शबालकः

ब्राह्ममुहूर्ते शय्यां त्यक्त्वा प्रभुं स्मरत्यादर्शबालकः।
नित्यक्रियां विधाय गुरुजनं सदा नमत्यादर्शबालकः ।।
योगासनं च प्राणायामं नित्यं करोत्यादर्शबालकः।
पाठं पठति च लिखति यथेष्टं विषयं स्मरत्यादर्शबालकः ।।
सात्त्विकभोजनपानं कृत्वा शालां यात्यादर्शबालकः।
नमति गुरून् गृह्णाति सुशिक्षां योग्यो भवत्यादर्शबालकः ।।

## सततिशिक्षाग्रहणम्

कलिकेभ्यो गृह्णीत सुस्मितं पुष्पेभ्यः सद्हासम् ।
मुक्तहस्तदानं वृक्षेभ्यो लतिकेभ्यो मृदुलासम् ।।
मधुगुंजनं मधुपवृन्देभ्यो विहगेभ्यः कलगानम्।
चन्द्रमसः शीतलतादानं सूर्यात् प्रभाप्रदानम्।
सागराद् गाम्भीर्यं ज्ञेयं, भूमेः क्षमाप्रदानम्।
गतिं नदीभ्यो नैरन्तर्यं, मेघेभ्यो जलदानम् ।।
प्रकृतिपाठशाला ददाति निःशुल्कशिक्षणं नित्यम् ।।
विना प्रमादं कर्तव्यं खलु शिक्षाग्रहणसुकृत्यम् ।।

## संस्कृते बालकानां रुचिः

संस्कृतभाषां वयं बालकाः सदा पठामः सदा लिखामः।
अस्य च गूढाध्ययनं कृत्वा खलु विद्वांसो वयं भवामः ।।
वेदोपनिषत्पुराणसंचितं ज्ञानं गूढं सदा स्मरामः ।
रामायणगीतायां भरितं ज्ञानामृतं सदैव पिबामः ।।
संस्कृतगूढज्ञानं दातुं देशविदेशं वै गच्छामः।
पुनश्च जगद्गुरोर्गौरवं पूज्यभारते वयं नयामः ।।

## पठनीया भाषा-संस्कृतम्

पठनीया खलु संस्कृतभाषा पठनीया।
श्रवणीया खलु संस्कृतभाषा श्रवणीया ।।
अखिला भाषामूलसंस्कृतं कथ्यं सत्यं जानय।
संचितमत्र सकल सूत्रणि तथ्यं सत्यं मानय ।।
ज्ञानं विज्ञानं च समस्तं विलसत्यस्मिन्नेव।
लौकिकपारमार्थिकविद्यायाः पिटकं संस्कृतमेव ।।
रमणीया खलु संस्कृतभाषा रमणीया।
पठनीया खलु संस्कृतभाषा पठनीया।।

## जागरणगीतम्

निशा गता आगतः प्रभातः।
पश्यत, नव जागरणं जातम्,
मन्दं मन्दं प्रवहति वातम्।
मधुपः कमलद्वारं गत्वा,
मधु मधुकरीं याचते नत्वा।
तमसः कष्टं सकलविनष्टं संसारोऽयं ज्योतिस्नातः
निशा गता आगतः प्रभातः।
पुष्पसुहासः लतिकोल्लासः ।
सरसि शोभने वीचिविलासः।
प्राची रमण्याः कलभालः,
सिन्दूरितो विभाति विशालः।
करं प्रसार्य बाल इव खेलति गगनांगने रविर्नवजातः।
निशा गता आगतः प्रभातः
बालविहगवृन्दे जागरणम्,
पश्यत जने जने जागरणम्।
सृष्टेः कणे कणे जागरणम्,
परितः क्षणे क्षणे जागरणम्।
निशा गता आगतः प्रभातः।।

**- लवकुश नगरम्, रामघाटः**
**अयोध्या, उत्तर प्रदेशः**

# अहं मयूरः

-वेदविभूषणो दण्डपाणिराचार्यः

शृण्वन्तु शृण्वन्तु वचो मदीयम्
समस्तलोकेऽस्मि खगेषु दिव्यः।
सौन्दर्यरूपेण विराजमानः
भ्रमामि वर्षासु नवोदयासु ।।१।।

आकर्ण्य मेघस्य सुभीमघोषम्
मोमुद्यमानः सहबन्धुवर्गः।
वितन्य पिच्छानि शुभानि सद्यः
नृत्यैः स्वकीयैर्मुदमातनोमि ।।२।।

बला मदीयं प्रियनृत्यमेतत्
दृष्ट्वा सदा हर्षहृदो भवन्ति।
मद्भावनाशंकितमानसास्ते
मौनेन पश्यन्ति मदीयनृत्यम् ।।३।।

तेभ्यो वटुभ्यश्च विभीतचित्तं
आकाशमार्गेण च धावमानम्।
समीक्ष्य मा याहि समेहि पार्श्वम्
इतोव वाक्यैः सुखयन्ति मां ते। ।।४।।

पश्यामि दिव्यं नु नवीनमालाम्
यदा तदा हर्षमना भवामि।
विचित्रपिच्छेन च नृत्यतो मे
स्वरूपमाकर्षयतीह चित्तम् ।।५।।

-श्री हरिप्रिया संस्कृत वैदिक गुरुकुलम्
श्रीसनातन धर्म मन्दिरं, शीदीपुरा
करोलबागः, नव देहली-११०००५

# अभ्यासेन विश्वासेन च सर्वं शक्यम्

-डॉ. अञ्जनातिवारी

एकदा सर्वे देवाः मिलित्वा भगवन्तं समक्षं गतवन्तः। सांसारिकजनानां दृष्ट्वा ते अतीव चिन्तिता आसन् ते भगवन्तं निवेदितवन्तः-प्रभो! इदानीं मानवाः दिने-दिने उदण्डाः जाताः। ते धर्मं न अनुसरन्ति, न च देवान् नमन्ति,न तु सदाचारं पालयन्ति च। तेषां रुचि केवलं सांसारिकभोगेष्वेव अस्ति। अतः तान् शिक्षणार्थं किञ्चित् उपायं करोतु। इति श्रुत्वा भगवान् मन्दहास्येन अवदत् -अस्तु! भवन्तेव वदन्तु किं करणीयम्? तदा देवर्षिनारदः उक्तवान्- भगवन्! एका युक्ति अस्ति, संसारे मान्यता अस्ति यदा पृथिव्यां पापं वर्धते तदा अकालो भवति। यदि अनेकानि वर्षाणि पर्यन्तं वृष्टि न भवेत् तदा मनुष्याः व्याकुलाः भविष्यन्ति। महान् संकटो आगमिष्यति। एतत् सर्वं सोढुं मनुष्याः समर्था न भवन्ति। जलं विना तु जीवनं दुष्करमेव। तदा महान् दुष्कालात् व्याकुला भूत्वा ते स्वयमेव धर्मं अनुसरिष्यन्ति देवान् चापि नमस्यन्ति। तेषां कृते इदमेव उचितं भवेत्। सर्वे देवाः नारदेन सह सम्मता भवन्ति। एतत् श्रुत्वा भगवता उक्तम् अस्तु! यथा भवन्तः इच्छन्तु इति।

तदन्तरं इन्द्र भगवन्तं निवेदयति भगवन्! अस्मिन् कार्ये शिवं नियोजतु। मन्यते यदा भगवान् शिवः डमरुवादनं करोति तदैव वर्षा भवति। अतः भगवान् एतस्याः समस्यायाः समाधानार्थं शिवम् आदिष्टवान्- भवान् द्वादश-वर्षाणि-पर्यन्तं डमरुवादनं मा कुरु इति। तदनन्तरं सर्वे देवाः स्वस्वलोकं गच्छन्ति। शिव अपि भगवतः आज्ञां शिरोधार्य स्वलोकम् आगच्छति। स अचिन्तयत् किमिति? सः सर्ववृत्तान्तं पार्वतीं अवदत्। पार्वती तं पृच्छति – नाथ! भगवता स्वक्रीडार्थमेव सृष्टि क्रियते, तर्हि कथं लोकं इत्थं कष्टं दातुमिच्छति स। इदानीं भवान् किं करिष्यति? शिव प्रत्युत्तरत् देवी! अहमपि न जानामि। परन्तु इदं सर्वं न केवलं मानव शिक्षार्थं क्रियते देवानामपि इति मम विश्वासः। अस्तु! भगवदादेशस्य पालनमेव मम कर्तव्यम्। पश्यतु तावत् किं भवति? इति विचार्य सः प्रतिदिनं पार्वत्या सह लोकभ्रमणार्थं गच्छति स्म। पृथिव्याम् आगत्य शिवः पश्यति यत् जनाः द्वादशवर्ष-पर्यन्तं महान् दुष्कालो भविष्यति इति ज्ञात्वा दुःखी सञ्जाताः। ते व्याकुला भूत्वा इतस्ततः भ्रमन्ति किञ्चित् समाधानार्थं परस्परं विमर्शयन्ति च किं करणीयम् इति? एतत् सर्वं दृष्ट्वा शिव अचिन्तयन्- अहो! विचित्रोऽयं मनुष्यः। कण्ठे प्राणागतेऽपि आशां स्वप्रयत्नं च न त्यजति। अस्तु! अन्यत्र गन्तव्यम्।

अथ स एकस्मिन् क्षेत्रे गतवान्। तत्र एको कृषकः आनन्देन क्षेत्रे हलं कर्षति स्म। तस्य हलेन वृषभाभ्यां च सह स क्षेत्रं अपरिभ्रमत्। एवं स नित्यमेव करोति स्म। तं कृषकं दृष्ट्वा शिव अति विस्मितो भूत्वा अचिन्तयत् कथम् सः प्रसन्नो भूत्वा क्षेत्रं कर्षति? किं न जानाति स यत् वृष्टि न भविष्यति? मूर्खोऽयं, व्यर्थोऽस्य प्रयत्नः। वृथैव परिश्रमं करोति। अस्तु! अस्य कारणं ज्ञातुं श्वः किञ्चित् करोमि। इति निश्चयं कृत्वा सः स्वलोकम् आगत्य कृषकविषये पार्वतीम् अवदत्। सापि एवं श्रुत्वा अतिविस्मिता जाता।

अन्यस्मिन् दिवसे कृषकस्य निश्चिन्तायाः कारणं ज्ञातुं शिवः पार्वत्या सह ब्राह्मणवेषं धारयित्वा तस्मिन्नेव क्षेत्रे आगच्छत्। कृषकस्तु प्रतिदिनमिव स्वकार्ये संलग्नो आसीत्। पार्वतीशिवौ कृषकस्य समक्षं गत्वा तं पृच्छतः

शिवपार्वतौ – किं करोषि त्वम्?

कृषक: उत्तरत् – न पश्यत: किम्? क्षेत्रे हलं कर्षामि।

शिव: – व्यर्थमेव तव श्रमम्। न जानासि किं द्वादशवर्ष-पर्यन्तं वृष्टि न भविष्यति?

कृषक: – जानामि। सम्यक् रूपेण जानामि।

शिव: – तर्हि कथं वृथा श्रमं करोषि? इदं न उचितम्।

कृषक: – तिष्ठतु भवान्! जानामि यत् वर्षा न भविष्यति द्वादशवर्षपर्यन्तम्। महान् दुष्कालोऽपि भविष्यति। परन्तु यदि अहं इत्थं न कुर्याम् तर्हि द्वादशेवर्षे तु अहं हलं चालयितुं क्षेत्रं कर्षयितुं च विस्मरिष्यामि। मम वृषभौ अपि चलनं विस्मरिष्यत:। तदा त्रयोदशेवर्षे किं करिष्यामि? वदतु। कार्यस्य अभ्यास भगवति विश्वासेव च मम कर्तव्य:। अग्रे भगवदिच्छा बलीयसी। इत्युक्त्वा स पुन: स्वकार्ये निमग्नो भवति।

अथ शिव स्वमनसि विचारितवान्- सत्यं कृषकस्य वार्ता । यदि द्वादशवर्षे स स्वकार्यं विस्मृतुं शक्नोति तथा अहमपि। तर्हि त्रयोदशवर्षे डमरुवादनं कथं करोमि? कथं वर्षा भविष्यति? इति विचार्य भगवान् शिव कैलाशं गत्वा डमरुवादनं करोति वृष्टि भवति च। कथ्यते अभ्यासेन विश्वासेन तु अशक्यमपि शक्यं भवति। भगवानपि स्वनिर्णयान् परिवर्त्तयति। अत: अविश्वासो न कर्तव्य:।

**-अतिथि प्रवक्ता, संस्कृत,**
**पालि एवं प्राकृत विभागः,**
**महाराजा सयाजिराव विश्वविद्यालय:**
**बड़ौदा, गुजरात**

# गांधी महोदय प्रति अप्रेषितम् ( पत्रम् )

अनुवादिका-
**डॉ. निरंजना जोशी**

''प्रिय बापू! सादरं प्रणामा:।

सविनय निवेदनम् यत् भवता प्ररोहिताया:अहिंसाया: वृक्षशाखाया: प्रतिदिनं कर्तनं भवति। अधुना तु तं वृक्षं पूर्णत: शुष्कं कृत्वा अहिंसात: 'अ' वर्ण: एवं निष्कासित:। निगलनकारा: केवलम् विकृता:,उन्मता: (प्रमत्ता:) किं वा अशिक्षिता: न, किन्तु स्वजना:, स्वबान्धवा:, गुरुजना: अथवा रक्षितारा: अपि शक्या:। वार्तापत्रिकानां पठनस्य स्थाने, तान् निष्पीडय महोदय! कलहं श्रोष्यते,अश्रुपात: दृश्यते एवं पतिष्यन्ति बहव: 'अ' वर्णा:। भवता एकदा कथितम् यत् तमसा कदापि न भेतव्यम्, किन्तु अधुना प्रकाशेऽपि वयं भीता:। न वेतालै:, पिशाचौ: च, मानवैरपि वयं भीतिमन्ता:। यदि वयं कुत्रापि असंमता:, तत्र 'सविनयम् असहकार' इदमेव भवता पाठितम्। किन्तु एतादृशस्य चिन्तनस्य अवसर: एव कुत्र? 'अ' वर्णस्य अभावे अपहरणम्, विकृतिकरणं ..अहो! अधिकं मया वर्णितुम् न शक्यम्। किन्तु हरणम्, हननम्, हत्या वा..। अहो! मृत्यो: अनन्तरमपि न सुरक्षिता: वयं। 'अ' वर्णस्य अभावात् एतादृशा: अनेका: अवलोकिता: वृत्तान्ता:। अन्या: तु केचन गृहमध्ये चतुसृषु भित्तिषु अनिवेदिता। अद्य 'पितृदिन' निमित्तं भवते उपहारम् दातव्यम्; तत्स्थाने याचनां कुर्म: यत् तम् 'अ' वर्णम् अन्विष्य शीघ्रं प्रेष्यताम् बापू! यत: हिंसाया: पूर्वं 'अ' वर्ण कवचरूपेण स्थापितुं शक्नुयात्। अन्यथा कदापि भवता तानि निष्पापानि वृक्षेषु लम्बितानि मधुरालापानि श्रोतुं न शक्यानि।

भवदीया भवत: दुहिता: वयसि १४ मासा:, १४ वर्षाणि, ४४ वर्षाणि, ६४ वर्षाणि वा का: अपि।

'आवर्तनम् ' - (प्रकाशित- अनुवादित काव्यसंग्रह:)

**-ए/37, ब्रोदर्स सी.एच.एस**
**दिलीप गुप्टे मार्ग:, महीम**
**मुम्बई-४०००१६**

# सर्वं श्रमेण सिध्यति

-वर्दा वसा

हनुमान् त्रिकूटपर्वतस्य उत्तुङ्गशिखरे उपविष्ट आसीत्। एतस्मात् स्थानात् संपूर्णां लङ्कां द्रष्टुं शक्यते। स्वर्णनगरी-लङ्का अत्यधिका रमणीया मनोहरा सुन्दरा च प्रतिभाति स्म। अनेकानि सरांसि, अनेकानि सुन्दराणि उपवनानि, अनेके उत्तुङ्गशिखरा नगरीमलङ्कुर्वन्ति स्म। हनुमान् किञ्चित्कालात् तत्रैव उपविश्य सीतान्वेषणविषये चिन्तयति,-'सीतामाता इदानीं कुत्र भवेत्? कदाचित् लङ्काधिपतिना सीतायै विशिष्टभवनस्य निर्माणं कृतं स्यात्। कदाचित् सा रावणस्य प्रासादे भवेद् अथवा कस्मिन् अन्यस्थाने! अस्तु। अलमधिकचिन्तनेन? किन्तु प्रत्येकं स्थानस्य निरीक्षणं मया कर्तव्यमिदानीम्।' इति।

हनुमान् अत्यन्तं लघुरूपमाधाय लङ्कानगर्यां प्रविशति। रावणस्य प्रासादः कोऽस्ति इति हनुमान् न जानाति। अतः स प्रत्येकं प्रासादं गच्छति। प्रथमं स सेनापतेः प्रहस्तस्य प्रासादं प्रविशति। तस्य प्रसादोऽतीव सुन्दरोऽस्ति। अत्र अनेके प्रकोष्ठाः सन्ति। अस्मिन् स्थाने अनेकाः स्त्रियाः सन्ति। किन्तु तासु कापि स्त्रीः सीतासदृशी नास्ति। अतो हनुमान् अन्यं प्रासादं गच्छति।

अयं प्रासादोऽतीव विशालोऽस्ति। अत्र प्रविश्य हनुमान् अत्र तत्र भ्रमति। स नीद्राधीनं मेघनादं पश्यति। मेघनादस्य आभा ग्रहणग्रसितसूर्य इव अस्ति। तस्य मुखकान्तिः अजेययोद्धासदृशी अस्ति। तस्य आजानबाहू शक्रविजयस्य कथां कथयतः। कदाचिद् इन्द्रजित् सदृशस्य महावीरस्यारक्षणेन सीता भवेद् इति विचिन्त्य हनुमान् सम्पूर्णे प्रासादे सीताया अन्वेषणं करोति। किन्तु सीतायाः चिह्नमपि न प्राप्नोति। अनेन प्रकारेण हनुमान् अकम्पनस्य, त्रिशिरायाः, दुमुर्खस्य, कुम्भकर्णस्य च भवनानि गच्छति। तेषां भवनानां प्रत्येकं स्थाने सीतान्वेषणं करोति। अन्ते स रावणस्य प्रासादं प्रविशति। रावणस्य स्वर्णप्रासादो मुक्तारत्नैर्विभूषितोऽस्ति। रात्र्यामपि तस्य भवनं दिवासदृशं विभाति। अस्य अतुलनीयां संरचनां वीक्ष्य हनुमान् अवाक् तिष्ठति। स पुनः सीतान्वेषणं प्रारभते। रावणस्य प्रासादे अनेकाः सुन्दरनार्यः सन्ति। ताः भिन्नलोकाद् अत्र बलपूर्वकं रावणेन आनीताः सन्ति। नार्यो नीद्राधीनाः सन्ति। अस्मिन् प्रासदे एको विशिष्टो लघुप्रासादोऽस्ति। अयं प्रकोष्ठो दुर्मतिरावणस्य अस्ति। हनुमान् सोत्साहमत्र प्रविशति। अस्मिन् प्रकोष्ठे स एकां साध्वीं सुलक्षणां वामनयनां पश्यति। स रावणस्य निकटे सुखेन शेते। तस्य प्रशान्तमुखारविन्दं दृष्ट्वा हनुमता ज्ञायते यत् सा सीता नास्ति। अतो हनुमान् प्रकोष्टाद् बहिरागच्छति। 'सीता कस्मिनपि प्रासादे नास्ति। सीता कुत्र भवेत्? कदाचित् सा लङ्काया गुहासु अथवा उपवनेषु वा अन्येषु स्थानेषु वर्तते। तदपि सर्वत्र मया निरीक्षणीयम्।? इति हनुमान् चिन्तयति।

स पुनः लङ्कायां विभ्रमति सीतान्वेषणं करोति च। प्रत्येकं गुहां, प्रत्येकमुपवनं, प्रत्येकं भवनं च पश्यति। किन्तु सीता न दृष्टिविषयीभवति। अन्ते स हतोत्साहो भवति। स पुनः एकवारं त्रिकुटपर्वतशिखरमारोहति।

'सम्पूर्णनगर्यां मयाऽन्वेषणं कृतं किन्तु कुत्रापि सीताविपयीणीं सूचनां न प्राप्यते। अधुना किं करणीयम्?

यदि रामकार्यमसिद्धं भवेत् तर्हि शरीरधारणस्य किं प्रयोजनम्? अहं  बालब्रह्मचारी। सीतान्वेषणकर्मणि मया नैका नीद्राधीना नार्यो रात्र्यां निरीक्षिता:। इदं कार्यं न समीचीनम्। किं मया अधर्म: कृत:? मम जन्मन: प्रयोजनं किमिदमस्ति? मम ब्रह्मचर्यव्रतस्य अधुना किं भविष्यति? कृतेऽपि अधर्माचरणे लोके कार्यसिद्धिस्तु भवत्येव। अधर्माचरणान्मुत्युर्वरम्। अहमधुना अस्मिन् महार्णवे जीवनं नंक्ष्यामि? इति उक्त्वा हनुमान् अत्यन्तदु:खी भवति। मरणात्पूर्वं स एकवारं श्रीरामचन्द्रस्य मुद्रिकाया दर्शनं करोति। स मुद्रिकाम् अञ्जल्यां गृहीत्वा नयनलोचकेन तस्याभिषेकं करोति। इयं मुद्रिका प्रभुणा अतीव विश्वासेन प्रदत्तास्ति। तेन कथितमासीद् यदीमां मुद्रिकां सीतां समर्प्य मम स्मरणं कारयतु। एवमेव प्रकारेण मुद्रिकां पश्यन् हनुमान् रामस्मरणं करोति। तेन अलौकिकं साहसमनुभूयते। सहसा तस्य मनसो नैराश्यं विनश्यति। स पुनरेकवारमात्मविश्वासेन साकमुत्तिष्ठति। स दृढतापूर्वकं कथयति, 'मया कोऽपि अधर्मो न कृत:। सीतान्वेषणावसरे मया नेका रमणीमणयो दृष्टा: किन्तु मम मनसि कोऽपि विकारो अथवा दुर्भावना नासीत्। मया निष्ठापूर्वकं कार्यसिद्धये प्रयत्न: कृत आसीत्। यदि सङ्कल्प: शुद्ध: उच्चो वास्ति तर्हि नियमभङ्गेऽपि दोषो न भवेत्। अहं पुन: सीतानुसन्धानं करिष्यामि।'

हनुमान् पुन: लङ्कानगर्यां वनान्युपवनानि च गच्छति। प्रमदावनस्य अशोकवाटिकायां स सीतासदृशीं सुलक्षणां पश्यति। सा अशोकवृक्षमूले स्थिता आसीत्। तां दृष्ट्वा हनुमान् बोधति यत् सा निश्चयेन जनकनन्दिनी अस्ति। दाशरथिहृदयेश्वरीदर्शनेन तस्य मनसि अपूर्वानन्दोद्भवति। स राममुद्रिकां हस्ते गृहीत्वा शीघ्रं पादपसमीपं प्रधावति।

एवमेव हनुमान् रामकार्यं सम्पादयति। जीवनमार्गे प्रायोऽवाञ्छनीया: कण्टका: समायान्ति। तान् कण्टकान् वीक्ष्य भयभीतो भूत्वा पलायनं न करणीयं न वा आचरणीयम्। कार्यसिद्धये कण्टकानाम् उन्मूलनमावश्यकम्। अत: आपत्सु कदापि धैर्यस्य, उत्साहस्यए सुबुद्धे: त्यागो न करणीय:।

**-संस्कृत, पाली एवं प्राकृत विभाग:, कला संकाय:,**
**महाराजा सयाजीराव विश्वविद्यालय:**
**बड़ोदा, बडोदरा**

# प्रत्युत्पन्नमतिः श्रेष्ठी

–डॉ. केशवराम शर्मा

**पात्रपरिचयः**

| | |
|---|---|
| १. जगन्नाथः | एकः श्रेष्ठी। |
| २. लक्ष्मी | जगन्नाथस्य पत्नी। |
| ३. एकश्चौरः | |
| ४. रामसिंहः | एकः प्रतिवेशी। |
| ५. ब्रह्मानन्दः | द्वितीयः प्रतिवेशी। |
| ६. दीनदयालुः | तृतीयः प्रतिवेशी। |

## अथ प्रथमं दृश्यम्

[निशायाः प्रथमः प्रहरः, श्रेष्ठिजगन्नाथः स्व भार्यया सह वार्तालापं कुर्वन् सुखेन शय्यायां तिष्ठति।]

**लक्ष्मी**– भवानतीवः सम्पन्नोऽसि। ग्रामे सर्वे जनास्त्वयि स्निह्यन्ति, किन्तु अस्माकं सम्पत्तिः कदापि विपत्कारणं भविष्यति। भवान् स्वनिवासाय नगरं कथं न गच्छति?

**जगन्नाथः** – यथा त्वयोक्तमत्र सर्वे जना मयि स्निह्यन्ति। यथाऽहं तेषां यदा–कदा साहाय्यङ्करोमि तथैव ते सङ्कटकालेऽवश्यमेव मम सहायका भविष्यन्ति। नगरे ईदृशः स्नेहः कुत्राऽस्ति?

**लक्ष्मी**– आत्मनो व्यवहारेण मनुष्याणां शत्रवो मित्राणि च जायन्ते। भवतां व्यवहारेण तत्राऽपि बहवो मित्राणि भविष्यन्ति।

**जगन्नाथः**:– अत्र ग्रामीणैः सहाऽस्माकं स्नेहधारा पितापितामहप्रपितामहादिभ्य आरभ्यः सतत प्रवाहशीलाऽस्ति। नगरे वयं बाह्यजना भविष्यामः। अत्राऽस्माकं प्रतिवेशिनोऽतीवसुहृदाः सन्ति। नूतनस्थले किं स्यात्को जानाति?

**लक्ष्मी**– अत्राऽऽवश्यकवस्तूनांमप्यभावोऽस्ति।

**जगन्नाथः**:– आवश्यकतानां काऽपि परिभाषा नाऽस्ति। तेषां न्यूनतैव सुखस्य निधानं भवति। उच्यते मनष्विभिः 'कोपीनवन्तः खलु भाग्यवन्तः'।

**लक्ष्मी**– हे महात्मन्! किं भवान्कोपीनाय स्पृह्यति?

**जगन्नाथः**:– ममैष तात्पर्यो नास्ति। अत्राऽऽवश्यकवस्तूनामभावः कुत्रास्ति? ग्रामे सन्ति शुद्धदुग्धघृतजलानि, स्वच्छप्राकृतिकपर्यावरणं, हरितशाकानि, सद्यः पक्वफलानि तथैव जनानां निश्छलहृदयाश्च।

**लक्ष्मी**– अत्र विद्युदद्भावोऽस्ति। मनोरञ्जनसाधनान्यपि सीमितानि, किमुत सामान्यव्यञ्जनानामर्थमप्यस्म-स्माभिर्नगरं गन्तव्यम्। यातायातव्यवस्थाया अभावो 'व्रणस्योपरिस्फोटोऽस्ति'।

**जगन्नाथः-** यस्मै कस्मै विद्युदभावो भवतु, अस्माकं गृहे विद्युदुत्पादनयन्त्रम् 'इलैक्ट्रिक जनरेटर' इत्याख्यमस्ति। मनोरञ्जनार्थं दूरदर्शनम् एकमेवोपकरणं पर्याप्तम्। व्यञ्जनानामावश्यकता जने-जने भिन्ना भवति। दिवसकाले यातायात व्यवस्था यथोचिताऽस्ति, पुनश्चाऽस्माकं स्वकीयं यानमप्यस्ति। इदानीं भवती ग्रामजीवनस्य लाभा अपि जानातु ।

**लक्ष्मी-** कीदृशा लाभाः?

**जगन्नाथः-** ग्रामस्य प्राकृतिकच्छटा वर्णनाऽतीता भवति। लतानां विटपानां सरोवराणां नदीनाञ्च नैसर्गिकशोभा नगरेषु कुतः? नगरवासिन आम्रफलानां रसमेव जानन्ति आम्रमञ्जरीणां दिग्दिगन्तव्यापिगन्धस्तेषां भागधेये नास्ति। तथैव ते दन्तधावनरूपेण निम्बवृक्षस्य कटुस्वादमेवाऽनुभवन्ति तस्य मञ्जरीणां तिक्तमधुगन्धं तत्र को जानाति? तेषां भाग्ये त्वालवालवल्लरीपुष्पाणां शोभैवाऽस्ति, ते प्रकृत्या विपुलवैभवं न जानन्ति। सर्वपपुष्पाणां तैलाक्तगन्धस्य पीताऽऽभायाश्च कुतोऽप्युपभानो नास्ति? शरदृतौ पक्वशालिमञ्जरीणां वसन्ते च गोधूममञ्जरीणां स्वर्णिमाऽऽभा दिग्दिगन्तव्यापिनी भवति।

**लक्ष्मी-** विरभ श्रीमन्! मन्येऽहं ग्रामशोभैव चारुतरा, किन्त्वहं चौरात्सुतरां विधेमि। रक्षकदलस्याऽभावे ग्रामेभे सुरक्षाया विशेषकरधनिकानां सुरक्षाया व्यवस्था नास्ति, अत एव मह्यं नगरं रोचते।

**जगन्नाथः-** सर्वेषां रक्षकः परमेश्वरोऽस्ति। ग्रामीणानां पारस्परिकसहयोगस्तेभ्यो निर्भयतां ददाति। नगरे प्रतिवेश्यपि सुखदुःखस्य वार्ता न करोति। तत्रापि भवन्ति नित्यप्रत्यपराधाः।

**लक्ष्मी-** चौराणामाधिक्यन्तु ग्राम एव भवति। अहं तेभ्यस्तथा बिभेमि यत्कीदृशोऽपि शब्दो मम निद्राभङ्गस्य कारणं जायते।

**जगन्नाथः-** मा भैषी। अहमस्मि तव समीपे। विगतः प्रथमो यामो यामिन्या इदानीं शयने मतिं कुरु। विद्युत्प्रकाशं मन्दं कुरु। प्रभोः स्मरणं कुरु येन तव स्वप्नेऽपि चौरो नाऽऽगच्छेत्।

[लक्ष्मी तथा करोति ।]

[पटाक्षेपः]

इति प्रथमं दृश्यम् ।

## अथ द्वितीयं दृश्यम्

[स एव कक्षः। निशायाः तृतीयः प्रहरोऽस्ति। द्वितीये कक्षे चौरस्य पदचापः श्रूयते।]

**लक्ष्मी-** [सहसा पदचापं श्रुत्वा निद्रामङ्गात्खिन्ना] स्वामिन्! किं भवता द्वितीयकक्षात् चौरस्य पदचापो न श्रुतः?

**जगन्नाथः-** (सर्वं ज्ञात्वोऽपि] कीदृशश्चौरः? कुतश्चौरः? त्वया शयनात्पूर्वं चौरस्य चर्चा कृताऽऽसीत्। अतः स्वप्नेऽपि तमेव पश्यसि।

**लक्ष्मी-** इदानीमहं स्वप्नद्रष्ट्री नास्मि। किं त्वयेदानीमेव पात्रस्य पतनशब्दो न श्रुतः?

**जगन्नाथः-** श्रुतः। तस्मिन्कक्षे मूषकानामाधिक्यं वर्तते। प्रतीयते यद् मार्जार्यागता। तस्या आगमनन्तु शुभमेवाऽस्ति।

[लक्ष्म्याः कर्णे शनैः किमपि कथयति ।]

**लक्ष्मी-** मम निद्राभङ्गा जाता। भवान्कमपि संलापं कुरु।

**जगन्नाथः-** अयमस्ति ममाऽनूकूलः प्रस्तावः। मासत्रयेण भवती पुत्रवती भविष्यति। कथयतु तस्य किं नाममुचितं भविष्यति?

**लक्ष्मी-** 'ज्येष्ठः पुत्रः पित्रे इष्टः'। भवानेव करोतु तस्य नामकरणम् ।

**जगन्नाथः-** मह्यं तु 'रामसिंहम्' इत्यभिधानं रोचते।

**लक्ष्मी-** इदं नाम तु क्षत्रियोचितमस्ति।

**जगन्नाथः -** आम्। एवं पारस्परिकसहयोगो दृढो भवति। किं क्षत्रियाणां वणिकोचितमभिधानं न भवति?

**लक्ष्मी-** तथैवाऽस्तु। रामसिंहो भविष्यत्यस्माकं प्रथमः पुत्रः। पुनश्च। वर्षत्रयाऽनन्तरमस्माकं द्वितीयपुत्रस्य किं नामोचितं भवताम् ?

[चौरस्तयोर्वार्तालापं दत्ताभिधानः शृणोति, तस्मिन्नेव कक्षे तूष्णीञ्च तिष्ठति]

**जगन्नाथः-** तस्य ब्राह्मणोचितं नाम 'ब्रह्मानन्द' इति भवेत्।

**लक्ष्मी-** मह्यमपि रोचते 'ब्रह्मानन्द' इति सुन्दरं नाम। यदि सौभाग्यात्तृतीयोऽपि पुत्रो भवेत्। भवते तस्य का संज्ञा रोचते ?

**जगन्नाथः-** तस्य वणिकोचितसंज्ञा 'दीनदयालु' इति भवेत्।

**लक्ष्मी -** इयं संज्ञाऽपि शोभना। नाहमतोऽधिकं सन्ततिमिच्छामि। परिवारनियोजनमप्यस्माकं धर्मोऽस्ति।

**जगन्नाथः-** वयं सम्पन्नाः साः। अतोऽस्मभ्यं 'लालूयादव' इव का चिन्ता? पुनश्च। त्रयाणां संख्या न शुभा, अतोऽहं चतुर्थमपि पुत्रमिच्छामि। [चौरस्तयोः पुनः शयनस्य प्रतीक्षां कुर्वस्तथैव तिष्ठति।]

**लक्ष्मी-** यदि भवतामेतादृश आग्रहोऽस्ति, तदाऽहं चतुर्थसन्तानं कन्यारूपेणेच्छामि। तस्या नामधेयं करोत् भवान्।

**जगन्नाथः-** वयं चत्वारो भ्रातरः स्मः तथैव ममापि चत्वारः पुत्राः सन्तु। यदि तुभ्यं कन्याऽपि रोचते, भवतु साऽस्माकं पञ्चमी।

**लक्ष्मी-** अहं चतुभ्योऽधिकसन्ततिः कदापि नाभिलषामि। अतो भवतु चतुर्थोऽपि पुत्रः। तस्य किं नाम भवतां रोचते?

**जगन्नाथः** तस्य शूद्रोचितं नाम 'चौरो' भविष्यति।

**लक्ष्मी-** किमुच्यते त्वया? किमिदमपि नामाऽस्ति? कथं भविष्यत्यस्माकं पुत्रश्चौरः?

**जगन्नाथः-** नाऽहं कथयामि कर्मणा चौरः। अभिधानेन किम्? किं शूद्राणामभिधानानि लुण्ठको', 'मुञ्चको', 'रूल्हा', 'कूडा' इत्यादयो न भवन्ति?

**लक्ष्मी-** अस्तु। भवान्कदापि कस्यापि किं शृणोति। भवेदस्माकं चतुर्थः पुत्रोऽभिधानेन 'चौर' एव।

**जगन्नाथः-** यदा ते क्रीडन्तो दूरं गमिष्यन्ति। क्रुद्धोऽहं तेषामाह्वानं करिष्यामि।

**लक्ष्मी-** दूरात्तेषामाह्वानं कथं भविष्यति?

**जगन्नाथः-** शृणोतु भवती। [उच्चस्वरेण आह्वयति भो रामसिंह! त्वं कुतोऽसि? शीघ्रमिहाऽऽगच्छ।

[चौरस्तथैव निश्चिन्तस्तेषां पुनश्शयनं प्रतीक्षते ।]

**जगन्नाथः-** [तथैव तारस्वरेण] भो ब्रह्मानन्द! त्वमपि शीघ्रमागच्छ। भो दीनदयालो! शीघ्रमिहाऽ गच्छ। किं न शृण्वन्ति भवन्तः? रामसिंह! ब्रह्मानन्द! दीन दयालो! शीघ्रमिहाऽऽगच्छन्तु। भो चौर! त्वं कुतोऽसि? त्वमपि शीघ्रमागच्छ।

[द्वाराद्बहिः कोलाहलो भवति। जगन्नाथो द्वारमुद्घाट्य तेभ्यः स्वगृहे चौरस्योपस्थितिं सूचयति। तेऽन्तः प्रविश्य चौरं धृत्वा निगडबद्धं कुर्वन्ति।]

**[ पटाक्षेपः ]**

**इति द्वितीयं दृश्यम्।**

**समाप्तमिदं 'प्रत्युत्पन्नमतिः श्रेष्ठी' नाम लघुनाटकम्**

**-बी-५९ उत्तरी छज्जुपुरम्, मार्ग सं.-३**
**शाहदरा, देहली**

# व्यावहारिक-संस्कृतम्

-मनोज कुमारः

**शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे।**
**साधवो नहि सर्वत्र, चन्दनं न वने वने ॥**

| | |
|---|---|
| **अद्य किं करणीयम्?** | अद्य संस्कृते संलपनं करणीयम्। |
| **भौमवासरे किं कृतम्?** | (भौम) मंगलवारे भ्रमणं कृतम्। |
| **प्रातः काले किं क्रियते?** | प्रातः काले भ्रमणं क्रियते। |
| **रमेशद्वारा किं क्रियते?** | रमेशद्वारा खेलनं क्रियते। |
| **रमेशः खेलनं करोति, भवान् किं करोति?** | अहं पठनं करोमि। |
| **भवान् पठनं करोति, अहं किं करोमि?** | भवान् पाठनं करोति। |
| **अहं संस्कृत पाठयामि, भवान् किं करोति?** | अहं संस्कृतं पठामि। |
| **गृहे लता किं करोति?** | गृहे लता चित्रांकनं करोति। |
| **भवान् गृहे किं करोति?** | अहं गृहे स्ववच्छताकार्यं करोमि। |
| **भवती किं करोति?** | अहं पाकशालाकार्यं करोमि। |
| **पाकशालायां किं करोति भवती?** | पाकशालायाम् अहं भोजन व्यवस्थां करोमि। |
| **साम्प्रतं (Now) कक्षाध्यापकः किं करोति?** | साम्प्रतं कक्षाध्यापकः संस्कृतं पाठयति। |
| **अधुना ( At this time ) प्राचार्यः किं करोति?** | अधुना प्राचार्यः विश्रामं करोति। |
| **भवान् क्रीडास्थले किं करोति?** | अहं क्रीडास्थले क्रिकेट खेलामि। |
| **रमा तत्र किं करोति?** | रमा तत्र बास्केटबालं खेलति। |
| **भवती किं कार्यं करोति?** | अहं विद्यालये अध्यापनं करोमि। |
| **भवती अध्यापयति, अहं किं करोमि?** | अहम् अध्यापयामि, भवान् अपि। (Also) |
| **भवान् पुस्तकालये किं करोति?** | अहं पुस्तकालये पश्यामि। |
| **भवती किं दर्शनं करोति?** | अहं दूरदर्शन दर्शनं करोमि। |
| **दूरदर्शने किं पश्यति?** | दूरदर्शने अहं महाभारतं पश्यामि। |
| **अहं दूरदर्शने किं पश्यामि?** | भवान् दूरदर्शने रामायणं पश्यति। |
| **अहं प्रातः काले कुत्र भ्रमणं करोमि?** | भवान् कुत्र भ्रमणं करोति अहं न जानामि। |
| **भवान् न जानाति अहं कुत्र गच्छामि?** | आम्, अहं न जानामि। |
| **अहं समुद्रतटं गच्छामि, भवान् कुत्र गच्छति?** | भवान् समुद्रतटं गच्छति। अहं नदीतटं गच्छामि। |

| | |
|---|---|
| भवती विद्यालये किं पठति? | अहं विद्यालये विज्ञानं पठामि। |
| नाटके अनिरुद्धः किं करोति? | नाटके अनिरुद्धः गायनं करोति। |
| भवती किं करोति, अभिजितः किं करोति? | अहं वादनं करोमि, अभिजितः नृत्यं करोति। |
| नाटके अहं किं करोमि? | नाटके भवान् निर्देशनं करोति। |
| अनुराधा ओ० के० स्थाने किं कथयति? | अनुराधा O.K. स्थाने युक्तं कथयति। |
| भवान् 'गुडबाइ' स्थाने किं कथयति? | अहं 'गुडबाइ' स्थाने 'शुभम्' कथयामि। |

इति ।

**-सम्पादक सहायकः**
**दि.स.अ.**

# शब्दार्थाः

## कृषि वर्गः

| | | |
|---|---|---|
| उर्वरा | – | उपजाऊ |
| ऊषरः | – | ऊसर |
| कणिशः | – | धुर्मुश |
| कृषिः | – | खेती |
| कृषियन्त्रम् | – | खेती का औजार |
| कृषीवलः | – | किसान |
| क्षेत्रम् | – | खेत |
| खनित्रम् | – | फावड़ा |
| खनियन्त्रम् | – | ट्रैक्टर |
| खलम् | – | खलिहान |
| खाद्यम् | – | खाद |
| तुषः | – | भूसी |
| तोत्रम् | – | चाबुक |
| दात्रम् | – | दँराती |
| पलालः | – | पराल |
| फालः | – | हल की फाल |
| बुसभ् | – | भूसा |
| मृत्तिका | – | मिट्टी |
| लाङ्गलम् | – | हल |
| लोष्टम् | – | ढेला |
| लोष्टभेदनः | – | पटरा |
| वसुधा | – | पृथ्वी |
| शाद्वलः | – | शस्यश्यामल |
| सीता | – | जुति भूमि |

# विद्यालय सम्बन्धि शब्दाः

| | | | | | |
|---|---|---|---|---|---|
| अङ्कः | - | नम्बर | प्रधानलिपिकः | - | हेडक्लर्क |
| अध्यापकः | - | अध्यापक | प्रबन्धकर्ता | - | मैनेजर |
| अध्येता | - | छात्र | प्रश्नः | - | सवाल |
| अध्येत्री | - | छात्रा | प्रस्तोता | - | रजिस्ट्रार |
| अनुपस्थितः | - | गैरहाजिर | प्राध्यापकः | - | प्रोफेसर |
| अन्तेवासी | - | शिष्य | प्रावरणम् | - | जिल्द |
| अवकाशः | - | छुट्टी | पृष्ठम् | - | पेज |
| अश्मपट्टिका | - | स्लेट | पंजिका | - | रजिस्टर |
| आचार्यः | - | शिक्षक | मन्दधीः | - | नालायक, मूर्ख |
| उपकुलपतिः | - | वाइस चांसलर | मसी | - | स्याही |
| उपशिक्षासंचालकः | - | डिप्टी डायरेक्टर | मसीपात्रम् | - | दवात |
| उपस्थितः | - | हाजिर | मसीशोषः | - | सोख्ता |
| कक्षा | - | क्लास | महाविद्यालयः | - | कालेज |
| कलमः | - | कलम | मार्जकः | - | डस्टर |
| कागदः | - | कागज | लेखनीमुखम् | - | निब |
| कुलपतिः | - | चांसलर | विद्यालयः | - | स्कूल |
| घर्षकः | - | रबड़ | विवादः | - | झगड़ा |
| तूलिका | - | पेन्सिल | विश्वविद्यालयः | - | यूनिवर्सिटी |
| धारा लेखनी | - | फाउण्टपेन | वेष्टनम् | - | बस्ता |
| पत्रम् | - | कागज | श्यामफलकः | - | ब्लैक बोर्ड |
| पट्टिका | - | पट्टी | सतीर्थ्यः | - | सहपाठी |
| परीक्षा | - | इम्तिहान | समयसारिणी | - | टाइम टेबिल |
| पत्रावली | - | फाइल | सुलेखः | - | अच्छा लेख |
| पाठशाला | - | विद्यालय | संचालकः | - | डाइरेक्टर |
| पाठ्यपुस्तकम | - | पाठ्यपुस्तक | संचिका | - | कॉपी |

## व्यापार वर्गः

| | | | | | |
|---|---|---|---|---|---|
| अभिकर्तृ | - | एजेन्ट, आढ़ती | निर्यात शुल्कम् | - | निर्यात पर चुंगी |
| अभिकरणम् | - | आढ़त | नैष्किकः | - | टकसालाध्यक्ष |
| अर्घः | - | भाव, रेट | न्यासः | - | धरोहर |
| अर्घापचितिः | - | भाव गिरना | प्राड्विवाकः | - | वकील |
| अर्घोपचितिः | - | भाव बढना | प्रतिभूः | - | जामिन |
| आयकरः | - | इनकम टैक्स | प्रतिद्वन्दिता | - | होड़ |
| आयातः | - | बाहर से आना | प्रतिश्रुतिः | - | प्रतिज्ञा |
| आयातशुल्कम् | - | आयात पर चुंगी | मन्दायनम् | - | मंदी |
| उपहारः | - | भेंट | मुद्रा | - | सिक्का |
| ऋणम् | - | उधार | मूलधनम् | - | पूँजी |
| करः | - | टेक्स | मूल्यम् | - | मूल्य |
| कितवः | - | धोखेबाज | विक्रयकरः | - | सेल्सटैक्स |
| क्रयः | - | खरीद | विनियमः | - | अदल-बदल |
| तुला | - | तराजू | शणपुटः | - | बोरा |
| तोलः | - | तोल | शुल्कम् | - | कमीशन, दलाल |
| तोलनम् | - | तोलना | शुल्काजीवः | - | दलाल |
| निर्यातः | - | बाहर जाना | शौल्किकः | - | चुंगी का अध्यक्ष |
| निर्यातशुल्कम् | - | निर्यात पर चुंग | | | |

# शब्द-रूपम्

**सुलू** = अच्छा काटने वाला पुरुष

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सुलूः | सुल्वौ | सुल्वः |
| द्वितीया | सुल्वम् | सुल्वौ | सुल्वः |
| तृतीया | सुल्वा | सुलूभ्याम् | सुलूभिः |
| चतुर्थी | सुल्वे | सुलूभ्याम् | सुलूभ्यः |
| पञ्चमी | सुल्वः | सुलूभ्याम् | सुलूभ्यः |
| षष्ठी | सुल्वः | सुल्वो | सुल्वाम् |
| सप्तमी | सुल्वि | सुल्वोः | सुलूषु |
| सम्बोधन | हे सुलूः | हे सुल्वौ | हे सुल्व! |

**स्वयम्भू ब्रह्मा**

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | स्वयम्भूः | स्वयम्भुवौ | स्वयम्भुवः |
| द्वितीया | स्यम्भुवम् | स्वयम्भुवौ | स्वयम्भुवः |
| तृतीया | स्यम्भुवा | स्वयम्भूभ्याम् | स्वयम्भूभिः |
| चतुर्थी | स्वयम्भुवे | स्वयम्भूभ्याम् | स्वयम्भूभ्यः |
| पञ्चमी | स्वयम्भुवः | स्वयम्भूभ्याम् | स्वयम्भूभ्यः |
| षष्ठी | स्वयम्भुवः | स्वयम्भुवोः | स्वयम्भुवाम् |
| सप्तमी | स्वयम्भुवि | स्वयम्भुवोः | स्वयम्भूषु |
| सम्बोधन | हे स्वयम्भूः! | हे स्वयम्भुवौ | हे स्वयम्भूवः |

**अतिचमू** = सेना को जीतने वाला

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अतिचमूः | अतिचम्वौ | अतिचम्वः |
| द्वितीया | अतिचमूम् | अतिचम्वौ | अतिचमूनः |
| तृतीया | अतिचम्वा | अतिचमूभ्याम् | अतिचमूभिः |
| चतुर्थी | अतिचम्वै | अतिचमूभ्याम् | अतिचमूभ्यः |
| पञ्चमी | अतिचम्वाः | अतिचमूभ्याम् | अतिचमूभ्यः |
| षष्ठी | अतिचम्वाः | अतिचम्वोः | अतिचमूनाम् |
| सप्तमी | अतिचम्वाम् | अतिचम्वोः | अतिचमूषु |
| सम्बोधन | हे अतिचमु! | हे अतिचम्वौ | हे अतिचम्वः |

**धातृ =ब्रह्म**

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धाता | धातारौ | धातारः |
| द्वितीया | धातारम् | धातारौ | धातॄन् |
| तृतीया | धात्रा | धातृभ्याम् | धातृभिः |
| चतुर्थी | धात्रे | धातृभ्याम् | धातृभ्यः |
| पञ्चमी | धातुः | धातृभ्याम् | धातृभ्यः |
| षष्ठी | धातुः | धात्रौः | धातॄणाम् |
| सप्तमी | धातरि | धात्रौः | धातृषु |
| सम्बोधन | हे धातः! | हे धातारौ | हे धातारः |

**पितृ** = पिता

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधन | हे पितः | हे पितरौ | हे पितरः |

# धातु रूपम्

## तप = दु:खी होना ( परस्मैपदी )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष–** | तपति | तपत: | तपन्ति |
| **मध्यमपुरुष–** | तपसि | तपथ: | तपथ |
| **उत्तमपुरुष–** | तपामि | तपाव: | तपाम: |

### ( लिट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तपाप | तेपतु: | तेपु: |
| **मध्यमपुरुष–** | तेतिथ, ततप्थ | तेपथु: | तेप |
| **उत्तमपुरुष–** | तताप, ततप | तेपिव | तेपिम |

### ( लुट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तप्ता | तप्तारौ | तप्तार: |
| **मध्यमपुरुष–** | तप्तासि | तप्तास्थ: | तप्तास्थ |
| **उत्तमपुरुष–** | तप्तास्मि | तप्तास्व: | तप्तास्म: |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तप्स्यति | तप्स्यत: | तप्स्यन्ति |
| **मध्यमपुरुष–** | तप्स्यसि | तप्स्यथ: | तप्स्यथ |
| **उत्तमपुरुष–** | तप्स्यामि | तप्स्याव: | तप्स्याम: |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तपतु, तात् | तपताम् | तपन्तु |
| **मध्यमपरुष–** | तप, तात् | तपतम् | तपत |
| **उत्तमपुरुष–** | तपानि | तपाव | तपाम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अतपत् | अतपताम् | अतपन् |
| **मध्यमपुरुष–** | अतप: | अतपताम् | अतपत |
| **उत्तमपुरुष–** | अतपम् | अतपाव | अतपाम |

( विधिलङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तपेत् | तपेताम् | तपेयुः |
| **मध्यमपुरुष–** | तपेः | तपेतम् | तपेत |
| **उत्तमपुरुष–** | तपेयम् | तपेव | तपेम |

( आ. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तप्यात् | तपेताम् | तप्यासुः |
| **मध्यमपुरुष–** | तप्याः | तपेतम् | तप्यास्त |
| **उत्तमपुरुष–** | तप्यासम् | तप्यास्व | तप्यास्म |

( लुङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अताप्सीत् | अताप्ताम् | अताप्सुः |
| **मध्यमपुरुष–** | अतप्सी | अताप्तम् | अताप्त |
| **उत्तमपुरुष–** | अतप्सम् | अताप्स्व | अताप्स्म |

( लृङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अतप्यत् | अतप्स्यताम् | अतप्स्यन् |
| **मध्यमपुरुष–** | अतप्स्यः | अतप्स्यतम् | अतप्स्यत |
| **उत्तमपुरुष–** | अनदम् | अतप्स्याव | अतप्स्याम |

**तुभ = मारना ( आत्मनेपदी )**

( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | तोभते | तोभेते | तोभन्ते |
| **मध्यमपुरुष–** | तोभसे | तोभेते | तोभध्वे |
| **उत्तमपुरुष–** | तोभे | तोभावहे | तोभामहे |

( लिट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तुतुभे | तुतुभाते | तुतुभिरे |
| **मध्यमपुरुष–** | तुतुभिषे | तुतुभाथे | तुतुभिध्वे |
| **उत्तमपुरुष–** | तुतुभे | तुतुभिवहे | तुतुभिमहे |

( लुट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | तोभिता | तोभितारौ | तोभितार: |
| **मध्यमपुरुष**– | तोभितासे | तोभितासाथे | तोभिताध्वे |
| **उत्तमपुरुष**– | तोभिताहे | तोभितास्वहे | तोभितास्महे |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | तोभिष्यते | तोभिष्येते | तोभिष्यन्ते |
| **मध्यमपुरुष**– | तोभिष्यसे | तोभिष्येथे | तोभिष्यध्वे |
| **उत्तमपुरुष**– | तोभिष्ये | तोभिष्यावहे | तोभिष्यामहे |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | तोभताम् | तोभेताम् | तोभन्ताम् |
| **मध्यमपुरुष**– | तोभस्व | तोभेथाम् | तोभध्वम् |
| **उत्तमपुरुष**– | तोभै | तोभावहै | तोभामहै |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अतोभत | अतोभेताम् | अतोभन्त |
| **मध्यमपुरुष**– | अतोभथा: | अतोभेथाम् | अतोभध्वम् |
| **उत्तमपुरुष**– | अतोभे | अतोभावहि | अतोभामहि |

( वि. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | तोभेत | तोभेयाताम् | तोभेरन् |
| **मध्यमपुरुष**– | तोभेथा: | तोभेयाथाम् | तोभेध्वम् |
| **उत्तमपुरुष**– | तोभेय | तोभेवहि | तोभेमहि |

( आ. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | तोभिषीष्ट | तोभिषीयास्ताम् | तोभिषीरन् |
| **मध्यमपुरुष**– | तोभिषीष्ठा: | तोभिषीयास्ताम् | तोभिषीध्वम् |
| **उत्तमपुरुष**– | तोभिषीय | तोभिषीवहि | तोभिषीमहि |

( लुङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अतुभत् | अतुभताम् | अतुभन् |
| **मध्यमपुरुष**– | अतुभ: | अतुभतम् | अतुभत |
| **उत्तमपुरुष**– | अतुभम् | अतुभाव | अतुभाम |

**अथवा**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अतोभिष्ट | अतोभिषाताम् | अतोभिषत |
| **मध्यमपुरुष–** | अतोभिष्ठाः | अतोभिषाथताम् | अतोभिढ्वम् |
| **उत्तमपुरुष–** | अतोभिषि | अतोभिष्यावहि | अतोभिष्यामहि |

**( लृङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अतोभिष्यत | अतोभिष्येताम् | अतोभिष्महि |
| **मध्यमपुरुष–** | अतोभिष्यथाः | अतोभिष्येथाम् | अतोभिष्यध्वम् |
| **उत्तमपुरुष–** | अतोभिष्ये | अतोभिष्यावहि | अतोभिष्यामहि |

**त्यज = छोड़ना ( परस्मैपदी )**

**( लट् लकार )**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | त्यजति | त्यजतः | त्यजन्ति |
| **मध्यमपुरुष–** | त्यजसि | त्यजथः | त्यजथ |
| **उत्तमपुरुष–** | त्याजामि | त्यजावः | त्यजामः |

**( लिट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | तत्याज | तत्यजतुः | तत्यजुः |
| **मध्यमपुरुष–** | तत्यजिथ, तत्यक्थ | तत्यजथुः | तत्यज |
| **उत्तमपुरुष–** | तत्याज | तत्यजिव | तत्यजिम |

**( लुट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | त्यक्ता | त्यक्तारौ | त्यक्तारः |
| **मध्यमपुरुष–** | त्यक्तासि | त्यक्तास्थः | त्यक्तास्थ |
| **उत्तमपुरुष–** | त्यक्तास्मि | त्यक्तास्वः | त्यक्तास्मः |

**( लृट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | त्यक्ष्यति | त्यक्ष्यतः | त्यक्ष्यन्ति |
| **मध्यमपुरुष–** | त्यक्ष्यसि | त्यक्ष्यथः | त्यक्ष्यथ |
| **उत्तमपुरुष–** | त्यक्ष्यामि | त्यक्ष्यावः | त्यक्ष्यामः |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | त्यजतु, तात् | त्यजताम् | त्यजन्तु |
| **मध्यमपरुष**– | त्यज, तात् | त्यजतम् | त्यजत |
| **उत्तमपुरुष**– | त्यजानि | त्यजाव | त्यजाम |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अत्यजत् | अत्यजताम् | अत्यजन् |
| **मध्यमपुरुष**– | अत्यजः | अत्यजतम् | अत्यजत |
| **उत्तमपुरुष**– | अत्यजम् | अत्यजाव | अत्यजाम |

( विधिलङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | त्यजेत् | त्यजेताम् | त्यजेयुः |
| **मध्यमपुरुष**– | त्यजेः | त्यजेतम् | त्यजेत |
| **उत्तमपुरुष**– | त्यजेयम् | त्यजेव | त्यजेम |

( आ. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | त्यज्यात् | त्यज्यास्ताम् | त्यज्सुः |
| **मध्यमपुरुष**– | त्यज्याः | त्यज्यास्तम् | त्यजास्त |
| **उत्तमपुरुष**– | त्यज्यासम् | त्यज्यास्व | त्यज्यास्म् |

( लुङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अत्याक्षीत् | अत्याष्टाम् | अत्याक्षुः |
| **मध्यमपुरुष**– | अत्याक्षीः | अत्याष्टम् | अत्याष्ट |
| **उत्तमपुरुष**– | अत्याक्षम् | अत्याक्ष्व | अत्याक्ष्म |

( लृङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अत्यक्षत् | अत्यक्ष्येताम् | अत्यक्षन् |
| **मध्यमपुरुष**– | अत्यक्ष्यः | अत्यक्ष्येतम् | अत्यक्षत |
| **उत्तमपुरुष**– | अत्यक्षम् | अत्यक्ष्याव | अत्यक्ष्याम |

**–सम्पादक सहायकः**
**दिल्ली संस्कृत अकादमी**

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347—1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

# "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित